National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2018; 1(20): 72-77
© 2018 NJHSR
www.sanskritarticle.com

**Dr. P.T.G. Ranga Ramanujachyulu**
Assistant Professor,
Department of Agama,
National Sanskrit University
Tirupati- 517507

**Correspondence:**
**Dr. P.T.G. Ranga Ramanujachyulu**
Assistant Professor,
Department of Agama,
National Sanskrit University
Tirupati- 517507

# श्रीमद्भगवद्गीता - श्रीरामानुजदर्शनम्

**Dr. P.T.G. Ranga Ramanujachyulu**

**पुण्याम्भोजविकासाय पापध्वान्तक्षयाय च।**
**श्रीमानाविरभूद्भूमौ रामानुजदिवाकरः।।**
**पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं**
**व्यासेन ग्रथिता पुराणमुनिना मध्ये महाभारते।**
**अद्वैतान्तरवर्षिणीं भगवतीमष्टादशाध्यायिनी-**
**मम्ब! त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम्।।**
**सर्वोपनिषदो गावः दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।** इति

सुप्रसिद्धोऽयं श्लोकः भगवद्गीता उपनिषत्सारभूता इति ज्ञापयति। प्रत्यध्यायान्ते **इति श्रीमद्भगवद्गीता- सूपनिषत्सु ब्राह्मविद्यायां योगशास्त्रे** इति चानुसन्धीयते। अत उपनिषत्सारतमा भगवद्गीता इति निर्विवादांशः। तथैव रामानुजदर्शनमपि **तदिहाखिलश्रुतिमतं रामानुजीयं मतमित्यार्योक्त्या** औपनिषदामेवं रामानुजसम्प्रदायस्य गीतायाश्च तौल्यं दरीदृश्यते। भगवद्रामानुजाचार्याणां भगवद्गीतायामत्यन्तादरः आसीत्, अत एव गीताभाष्यं भगवद्रामानुजाचार्यैः प्रणिनाय। ब्राह्मसुत्रभाष्ये सुत्रस्थ स्मृतिशब्दस्य भगवतद्गीतामेवोदाह्मतम्। अतः रामानुज- सिद्धान्तः परिपूर्णतया भगवद्गीतामनुवर्तते।

**रामानुजदर्शने मुख्यांशाः**

रामानुजदर्शने एते प्रधानार्थाः भगवद्गीतायां सुस्पष्तया सप्रमाणैः सम्प्रति निरूप्यन्ते।

**1.रामानुजदर्शने प्रधानं तत्वत्रयं चिदचिदीश्वरश्चेति।**

**2.श्रीमन्नारायण एव परतत्वम्।**

**3.सर्वात्मकः परमात्मा सर्वास्वप्यवस्थसु चेतनाचेतनयोरन्तर्यामित्वेन विराजते।**

**4.सकलकल्याणगुणाकरः परमात्मा एव उपसितव्यः।**

**5.जगतः सृष्टिस्थितिसंहाराः प्रवृत्तिनिवृत्तयश्च भगवदधीना एव।**

**6.भगवदाराधना सदा कार्या।**

**7.भगवन्निवेदितपदार्थ एव स्वीकारयोग्यः।**

**8.अवश्यानुष्ठेयाः समस्तशास्त्रधर्माः भगवत्प्रीत्या कैङ्कर्यबुध्या फलसङ्गकर्तृत्वादीनि विहायानुष्ठेयाः।**

**9. देवतान्तरेषु परत्वबद्धिः त्याज्यः।**

**10. जीवेश्वरभेदः नित्यः।**
**11.जीवः अणिपरिमाणभूतोऽपि नित्य एव।**
**12.जीवानां शेषत्वपारत न्त्र्यौ प्रधानलक्षणे।**

**तत्वत्रयम्**

श्रीरामानुजदर्शने चिदचिदीश्वरतत्त्वानि त्रीणि मुख्यानि। तानि त्रीणि तत्त्वानि भगवद्गीतायां त्रयोदश-चतुर्दशपञ्चदशाध्यायेषु क्रमेण विवृताः। त्रयोदशाध्यायस्य क्षेत्रक्षेत्रज्ञविभागयोग इति व्यवहारः। गीताशास्त्रं षट्कत्रयरूपेण विभक्तम्।

द्विकं नाम प्रथमद्वितीयाध्यायौ। चतुष्कं नामाध्यायचतुष्टय-समुदायः। प्रथमे द्विके शास्त्रसम्बन्धोपोद्धतः, शास्त्रावतरणस्य कारणं दुःखनिवृत्त्यर्थमात्मसाक्षात्कार इति प्रथमचतुष्के आत्मदर्शनविवरणञ्च न्यरूपि। मध्मम -षट्कं त्रिकद्वयम्। त्रिकं नामाध्यायत्रयसमुदायः। प्रथमत्रिके साधनाधिकारिभेदाः भक्तियोगः, द्वितियेत्रिके भक्तिसिद्धये, वृद्धौ च साधनानि प्रोक्तानि। तृतीयषट्केऽपि त्रिकद्वयरूपेण विभक्तम्।
प्रथमत्रिके चिदचिदीश्वरेति तत्वत्रयमुद्दिश्य क्रमेणोक्तम्। शेषं त्रिकं कर्तव्यविवेचनपरम्। विभागानुसारं त्रयोदशचतुर्दशपञ्चदशा-ध्यायेषु क्रमेण चिदचिदीश्वराः इति तत्वत्रयं विस्तृतया व्याख्यातम्। सप्तमाध्यायारम्भे भगवता चतुर्थपञ्चमश्लोकयो अक्षरं नामापरातिरिति, चेतनं पराप्रकृतिरिति, प्रकृतिद्वयमुपि भगवदधीनमित्युक्तम्। एवं तत्व त्रयं सिद्धम्। तदुक्तं भगवता-

**मम योनिर्महद्ब्राह् तस्मिन् गर्भं दधाम्यहम्।**
**सम्भवस्सर्वभूतानां ततो भवति भारत।।** इति

सर्वाणि भूतानि, मूलप्रकृतिः ममाधीना एव तस्यां चेतनपुरुषं गर्भमहमेव स्थपयामीत्यत्र भेगस्यसाधनाभूतायाः अचेतनप्रकृत्या भोक्तृवर्गरूपचेतनप्रकृति उपस्थापिता। भगवत्सङ्कल्पेनानेन संयोगेन ब्राह्मादिस्तम्बपर्यन्तं सकल -भूतानि समुत्पद्यन्ते। एतद्भगवद्वाक्यमनुसृत्य चेतनम्, अचेतनम् ईश्वर इति त्रीणि तत्वानि पृथग्विद्यन्ते। छान्दोग्ये- **सत्यं ज्ञनं अनन्तं ब्राह्म** इति सत्यशब्दः व्याख्यातः।

**तस्य हवा एतस्य ब्राह्मणोनाम सत्यमिति तानि ह वा एतानि त्रिण्यक्षताणी सत्यमिति सत्तदमृतमथयन्ति तन्मत्यम् अथयच्यं तेनोभे यच्छति यदनेनोभेयच्छति तस्मातहम्महरहर्वा एवं विस्त्वर्गं लोकमेति।।**[१]

सत्यं नाम ब्राहमा अयं शष्दः सत्-ति-यमिति पदत्रयसमूहः तत्र सत् नाम शश्वतम् आत्मा ति नाम क्षणे परिवर्तमाना प्रकृतिः। यम् नाम अनयोः द्वयोः संयोजकः परमात्मा इत्यत्र तत्व त्रयं ज्ञायते।

**प्रकृतिं पुरुषं चैव विध्यनादी उभावपि।**[२] इति गीतावाक्यम्।

चित्-अचित्-नाम जीवःप्रकृतिश्च उभावपि अनादीति ज्ञायते। अनयोः द्वयोः शासकः अध्यक्षः भगवान् इति भगवद्गीतायाः सिद्धान्तः एव भगवद्रामानुजसिद्धान्तः। प्रकृतिः जीवश्च भगवदधीनावेव इति ज्ञयते। यथा-

**मयाध्यक्षेण प्रकृतिः सूचते सचतातरम्।**
**हेतुवादेन कौन्तेय जगद्धिपरिवर्तते।।**[३] इति

इत्थं तत्वत्रययाथात्म्यं बोध्यम्। तथैव गीताप्रमाणानि स्वीकृत्य भगवद्रामानुजैः परमात्माधीने जीवः प्रकृतिश्च वर्तते उत्यग्ङीकृतम्।

**श्रीमन्नारायण एव परतत्वम्**

अंशममुमुद्दिश्य परमाचार्चैः यामुनाचार्यैः प्रतिपादितं प्रधानत्वं एव मुक्तम्

**स्वधर्मज्ञानवैराग्यसाध्यभक्तकगोचरः।**
**मारायणपरंब्राह् गीताशास्त्रे समिरितः।।**[४]

शस्त्रोक्तवर्णश्रमधर्माणां सम्यगनुष्ठानेन वैराग्यं सिध्यति। तेन भक्तिः वर्धते। भकत्यैकगोचरः नारायण एव भगवानित्यत्र नास्ति संशयः। तत्र गीतायां भगवानुवाच-

**मत्तः परतरं किंचिदस्ति धनञ्जय।**
**मयि सर्वमिदं प्रोक्तं सूत्रे पणिगणा इव।।**[५] इति।

तथैव तेनोपदेशेन विशवासपूर्वकं कौन्तेयःवक्ति न तत्ससोऽभ्यधिकोकुतोऽन्यो लोकत्रयेतेयप्यप्रतिमप्रभाव। **हे भगवन्। निखिलणगति त्वत्समः, समो वा न स्यत्त तर्हि अधिपः कः भवेदिति इत्युक्तम्।**[६]

**त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परंनिदानम्**
**त्वमव्ययः शाश्वतधर्मगोप्ता सनाततनस्त्वं पुरुषो मतो मे।।**
(११.१८)

उपनिषत्सु बोध्यं अक्षरं परमं विश्वस्य परं निदानं सनातनपुरुषश्च एव वेदहमेतं पुरुषं महान्तं आदित्य-वर्णं तमसः परस्तात्, परात्परं पुरुषमुपैति दिव्यम्, ब्राह्मणमीशं कमलासननस्थं इति। तच्छत्वा भगवता उक्तम्- **अहमादिर्हि देवानां** इति ब्राह्मरुद्रेन्दादिदेवेभ्यः कारणभूतः अहमेवेति **अहं सर्वस्य प्रभवः(१०.८)** इति
विचित्रचिदचित्प्रपञ्चस्य सर्वकारणभूतः अहमेवेति स्वयमेवोक्तम्।

**परंब्राह्परं धाम पवित्रं परमं भवान्।**
**पुरुषंशाश्वतं दिव्यमादिदेवमजं विभुम्।। (१०.१३)** इति

परत्वं भवानेवेति भगवन्तं संस्तुत्य अर्जुनः तस्य साक्ष्यरूपेण सकलऋषीन् जेवर्षिं नारदं, असितं, देवलं, व्यासं संप्रदश्य श्रीम्न्नारायण एव परतत्त्वमितिनिर्धारयामास। नारायणानुवाके प्रत्येकतया नारायणपरत्वं विशदीचकार। कारणं वस्तु ध्येयमिति,

तदेव मेक्षप्रदमिति श्रुतिभिरुक्तरीत्या बहुषु स्थलेषु भगवानहमेव समनस्ताकारभूत इति मद्याजी, मां नमस्कुरु, मामेव ये प्रपद्यन्ते तानेवाहं रक्षिष्यामि मोक्षयिष्यामीतिशपथपूर्वकेन श्रावयामास। अतः नारायणतत्त्वं स्पष्टं भवति। भगवद्गीतायां निर्दिष्टं नारायण परतत्त्वमेव भगवद्रामानुजैः दर्शने स्थिरीकृतम्। उपनिषत्सु तैत्तिरीयान्तर्गतायां भृगुवल्ल्यां भृगुः पितरं वरुणमपृच्छत् परब्राह्मतत्त्वमुद्दिश्यवरुणः वदति- **यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म**[७] इति तस्मादेवार्जुनः तादृशलक्षणोपेतः भगवानित्येवं स्स्तुवन्– **परंब्रह्म परंधाम पवि परमं भवान्(१०.१२)** इति। भगवता एवं समाधत्त- **मम योनिर्महद्ब्राह्म तस्मिन् गर्भं दधाम्यहम्(१४.३)** स सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः। तासां ब्राह्म महद्योनिः अहं बीजः प्रदः पिता।।(14.4) देवगन्धर्वयक्षराक्षसमनुष्यमृग पक्षि-सरीसृपादि जन्मनां कारणं मूलप्रकृतिरेव। तस्याः प्रकृतेः विकारेषु शरीरेषु तेषां कर्मानुगुणेन चेतनवर्गानां संयोजकः भगवानेव। तथोक्तं भगवता- **अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।(७.६),** इति, **पितामहस्य जगतः(९.१७), प्रकृतिं स्वामष्टभ्य विसृजामि पुनः पुनः।**

**भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्।।** इति

स्वाधीनां भुवं **, भूमिरापोनऽनलो वायुः खं मनो बुद्धिरेव च(७.८)** इत्यष्टधा परिणमय्य देवतिर्यङ्मनुष्य-स्थावररूपचतुर्विधभूतजातान् प्रकृत्यधीनान् विधीयते। अष्टमाध्याये आब्राह्मलोकान्, तद्वासिनामपि परमपुरुष-संकल्पेन उत्पत्तिस्थिलिलयादिषु प्रवेश्य सर्वज्ञत्वं भगवता प्रत्यपादि। विश्वरूपसन्दर्शनयोगे भगवता एवमुक्तम्- **कालोऽस्मि लोकक्षयकृत्प्रवृत्तो लोकान् समाहर्तुमिह प्रवृत्तः। (११.३२)** इति सर्वस्य जगतः सर्वाधारभूतः संहारकर्ता च परमात्मा एव। अत्र **कल-संख्याने** इत्यस्माद्धातोः सर्वेषां चेतनाचेतनानां जीवनप्रमाणानि निर्णीय संहरतीति हेतुना कलशब्दादुत्पन्नः कालशब्दः।

**गामाविस्य च भूतानि धारयाम्यहमोजसा। (१५.१३)**
**मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।**
**मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः।। (९.४३),**
**भूतभृन्न च भूतस्थो ममात्मा भूतभावनः।। (९.५)** इति

चेतनाचेतनात्मकजगदन्तर्यामितयात्वेन नियामयन् शेषी इव राराजते। विषयेऽस्मिन् भगवतः न किञ्चिदपि प्रयोजनं विद्यते। केवलं भगवत्संकल्पेनैव सकलभूतानां सृष्टिस्थितिलयादयः सम्भवन्ति। एवमेव-

**सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।**
**कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।। (९.७)** इत्यनेन

स्थावरजङ्गमात्मकप्रपञ्चमिदं चतुर्युगानामन्ते परमात्मनि लीयते। पुनः कल्पादौ भगवत्संकल्पानुसारं उत्पद्यते।

**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते (७.१५)** इत्यत्र यो नर एतादृशगुणविशिष्टं परमात्मानं शरणमाप्नोति सः सत्त्वरजस्तमोगुणात्मकप्रकृतिमतिरिच्य भगवन्तमेवाप्नो-तीति, ज्ञायते। तथैव-

**मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।**
**नाप्नुवन्ति महात्मानः संसिदिं०ध परमां गतिम्।।** इति

श्लोकानुसारं भगवन्तं प्राप्य न पुनरावर्तन्त इति परमपुरुषार्थरूपमोक्षमाप्नुवन्तीत्यर्थः।

**भगवान् सकलकल्याणगुणाकरः**

भगवद्गीतायामुक्तरीत्या सृष्टिस्थितिलयकर्ता सर्वरक्षकः सर्वकार्याणां निर्वहणाय सर्वज्ञत्वसर्वशक्तित्व - सत्यसंकल्पत्ववात्सल्यादीनां कल्याणगुणानामावश्यकता वर्तते। तथैव-

**मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।**
**नाप्नुवन्ति महात्मानः संसिद्धिं परमां गतिम्।।** इति

श्लोकानुसारं भगवन्तं प्राप्य न पुनरावर्तन्त इति विषयद्वारा परमपुरुषार्थरूपमोक्षमाप्नुवन्ति। भगवद्गीतायां भगवता स्वयं सृष्टिस्थितिलयनिर्वहणे सर्वज्ञत्वसर्वशक्तित्वसत्यसंकल्पत्ववात्स-ल्यादिकल्याणगुणाः प्रमुखतां वहन्ति। कृपादानगोचरा परोक्षज्ञानचिकीर्षा कृतिमत्वं कर्तृत्वमिति शात्रज्ञैः कर्तृत्वस्य लक्षणमुक्तम्। **सदेव सोम्येदमग्र आसीत**[८] इत्यत्र सत्यसंकल्पत्वं प्रधानभूमिकां वहति। रक्षणं नाम इष्टप्राप्त्यनिष्टनिष्ट-निवारणमित्यर्थः। अस्मिन् कर्मणि सर्वज्ञत्वसर्वशक्तित्वगुणौ निदानभूतौ। **प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः(७.१७)** इत्यत्रात्यर्थमिति पदं प्रयुक्तं भगवता श्रीकृष्णपरमात्मना। अत्यर्थपदस्य **अर्थोऽभिधेयदैवस्तु प्रयोजननिवृत्तिषु** इति गीताभाष्यकथनम्। अमरकोशके **अत्यर्थपदस्याति क्रान्ताभिधेयत्वमिति** व्याख्यातम्। मद्भक्तस्य मयि विद्यमानाः भक्तिः सर्वज्ञशर्वशक्ति - युक्तोऽहमपि ज्ञातुमशक्त इति भगवतः श्रीकृष्णस्याभिप्रायः। तादृशाः भक्ताः प्रधानतया-

**चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।**
**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।(७.१६)**

इत्युक्तरीत्या

आर्तः, जिज्ञासुः अर्थार्थी, ज्ञानीचेति चतुर्विधाः। तेषु चतुर्विधेषु

स्वस्यादरं प्रदर्शयन्- **उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मत (७.१८)**मित्यात्मनः पुरुषार्थान् संप्राश्र्य ये आप्नुवन्ति ते उदारा इति भगवदुक्तिः।

अत्र ज्ञातव्यः कश्चन विशेषः भगवद्रामानुजैरभिहितम्। लोके यो स्वीकुर्वन्ति ते कथं उदाराः स्युः? इति चेद्भाष्यकाराःएवमभभिदधति ये भगवत्सकाशायद्किञ्चि-द्गृण्हन्ति ते भगवते सर्वस्वदायिनः इति, अत्राश्रित-सकलफलप्रदत्वमेव सर्वस्वमिति भगवतः स्वाभिप्रायः इत्यर्थः। ये भक्ताः परमात्मनः सकाशाकोऽपि पुरुषार्थः प्राप्नुवन्ति ते उदारा इति भगवदभिप्रायः। अयमेव हि कल्याणगुणः।

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।**

**तदहं भक्त्युपहृतं अश्नामि प्रयतात्मनः।।**[९] श्लोकेऽस्मिन्

प्रयतात्मनः इति पदं फलपुष्पपत्राणां भगवते यो समर्पयति तस्य योग्यतां बोधयति। तत्प्रदानैकप्रयोजनरूप परिशुद्धमनसः प्रयोजनान्तरापेक्षया समर्पणमेवात्र मुख्यमिति तमेव भगवाननुगृण्हातीति कथनेन औदार्यमिति कल्याणगुणः भगवतः ज्ञायते। एवं यो दद्यात्तमेवाहमश्नामीति सारांशः। विषयस्यास्य भाष्यकाराः एवं विवृण्वन्ति। यथा- **अहं सर्वेश्वरो निखिलजगदुदयविभवलयलीलोअवाप्तसमस्तकामसत्यसंकल्पोऽन वधिकाति-शयानन्दस्वानुभवे वर्तमानोऽपि मनोरथपथदूरवर्ति-प्रियं प्रप्येवाश्नामीति।** एतानि पत्रादिसामान्यद्रव्याणि स्वीकर्तुं विरुद्धानि प्रकाराणि बहुभिः विशेषैः विज्ञाप्यन्ते।

**सर्वेश्वरः-** इन्द्रादयः आत्मनः शक्तेर्वर्धनाय हविरादीनि स्वीकुर्वन्ति। भगवानन्तर्यामितया तेषु स्थित्वा नियमयति। निखिलजगदुदयलयलीलः भगवान् फलपुष्पपत्रादिलीलोपकर-णानि स्वयमेवानुगृण्हाति।

**अवाप्तसमस्तकामः-** ईक्षणरूपादिसकलविधान् कामान् भगवनान् स्वयमेव संकल्प्य निर्वहतीति हेतोः तस्यावाप्त - समस्तकामत्वं बोध्यते।

**सत्यसंकल्पः-** सः भगवान् स्वयमेव सर्वमपि मनसि संकल्प्य सृजतीत्यनेन सत्यसंकल्पः स्पष्टं भवति।

**अश्नामि-** जलभक्षणमपि भगवान् करोतीति चेद्यदि युक्त्या यो भक्तः समर्पयति तं पदार्थं युक्त्या एव, पेयं वस्तु पानं कृत्वा खाद्यं वस्तु भक्षति सः भगवानित्यर्थः। अस्यैव स्वाराध्यत्वमित्युच्यते। अयमपि कश्चन विशिष्टः कल्याणगुण एव। तदनु-

**अपि चेत्सुदुराचारो भजते माममनन्यभाक्।**

**साधुरेव स मन्तव्यः सम्यग्व्यवहितो हि सः।।(९.३०)** इति

शास्त्रोक्तवर्णाश्रमधर्मान् परित्यज्य यो व्यतिरेकपथा व्यवहरति तादृशः दुष्टः यदि मद्याजी भवेत्तर्हि सोऽपि वैष्णवाग्रेसर एवेति भगवद्वचनम्। अयमेव हि वाक्यमिति कल्याणगुणविशेषणम्। एतादृशानि कल्याणगुणानि भगवद्गीतायां नैकशः सन्दृश्यन्ते।

**भगवदाराधनं नित्यं कुर्यात्**

श्रीरामानुजदर्शने पञ्चसंस्कारसम्पन्नस्य वैष्णवस्य मुख्यः नित्यभगवदाराधनाविधिः।

**तापः पुण्ड्रः तथा नाम मन्त्रो यागश्च पञ्चमः।**

**अमी ते पञ्चसंस्काराः परमैकान्तिहेतवः।।** इत्युक्तरीत्या

प्रपन्नः सदाचार्यसमाश्रयणेन शंखचक्ररूपभगवच्चिह्नान् भुजयोः संधार्य ऊर्ध्वपुण्ड्रानि, दास्यनामधारणम्, नित्यं भगवदाराधनम्, लब्धस्य मन्त्रन्यार्थयुक्तेनानुसन्धानं विधिवत्करणं वैष्णवलक्षणम्। एतेषु भगवदाराधनं प्रधानाङ्गतया परिगण्यते। गीतायां भगवानेवमुक्तम्। यथा-

**ये यथा मां प्रपद्यन्ते तां तथैव भजाम्यहम्।**

**मम वत्र्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।। (४.११)** इति।

कवितार्किकसिंहः श्रीमद्वेदान्तदेशिकः भगवद्गीतायाः व्याख्यायां तात्पर्यदीपिकायामाचार्याणां श्रीभाष्यकाराणां ह्यदमेवं प्रस्फुटन्ति। यथा- **एवं साधुपरित्राणार्थं देवमनुष्यादिसजातीय-स्वेच्छावतारवर्णनमुखेन उपासनोपयुक्तं स्वसौलभ्यमुक्तम्। अथ तस्यैवकाष्टा प्राप्तां दशां दर्शयति ये यथेति श्लोकेन।अत्र कृष्णावतारवृत्तान्तेन सहार्चावतारवृत्तान्तोऽपि संगृहीतः** इति। अत्र सद्रक्षणधर्मसंस्थापनरूपप्रयोजनसिद्धये देवमनुष्यादिरूपेणा-वतरणे उपासकस्य विषये भगवतः सौलभ्यमिति कल्याणगुणस्य सीमाभूमिं दर्शयन्ति वेदान्तदेशिकचरणाः।

दशमाध्याये अष्टमश्लोकादारभ्य चतुांस्त्रिशच्छलोकान्तं मोक्षोपायरूपनिरतिशय परमपुरुषार्थ एव सुकर इति, तल्लाभाय भगवन्तं श्रीमन्नारायणमेव परमप्राप्यतया ध्यातव्यमिति निश्चितम्। अथवा दशमश्लोके **मत्कर्मपरमो भव (१२-१०)** इत्यनेन देवालयनिर्माणारामादिनिर्माणमन्दिरसम्मार्जनजलसम्प्रोक्षणदीप ज्वालनरङ्गवल्लीभिरवङ्क -रणनैकविधपुष्पसञ्चयनार्चनानाम-संकीर्तनप्रदक्षिणादीनिस्तोत्रानुसन्धानरूपाणि विविधकर्माणि भगवत्पराणीति मत्वाऽचरस्व। अत्र मत्कर्म नाम भगवदानन्तदायकं कर्मेत्यर्थः। **मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु(९.३४)** इत्यनेन मद्भक्तः, मद्याजीति द्वयोः पदयोः श्रीभाष्यकाराः अनवधिकातिशयप्रियभगवदनुभव- प्रीतिकारि-तमद्यजनपरो भव। यजनं नाम परिपूर्णशेषवृत्तिः। औपचारिकसांस्पर्शिकाभ्यवहारिकसांदृष्टिकसकल-भोगप्रधानरूपो हि यागः इति व्याचख्युः। भगवान् सकलकल्याणगुणाकरः, दृष्टिचित्तापहारिसौन्दर्यसीमाभूमेः कारणात् तया प्रीत्या भगवन्तं नारायणं परमपुरुषं परमप्रयोजनरूपत्वेन संभाव्य समर्चयेदिति

सारांशः। भगवदर्चने औपचारिक रूपान् चतुर्विधोपचारान् निरतिशयप्रीत्या आत्र्या च कर्तव्या इति श्रीभष्यकाराणां मतम्। औपचारिकं नीराजनादीनि, अभ्यवहारिकानि भोगरागादीनि, सांदृष्टिकानि दीपोपकरणादीनि एवं सांस्पर्शकानि रुाक्चन्दनादीनित्यर्थः। एतेषां चतुर्णामाचरणमेव भगवदाराधनमिति तात्पर्यम्।

**वैदिककरमाचरणविधानम्**

भगवद्रामानुजदर्शने अस्माभिः क्रियमाणानां शास्त्रविहितवर्णाश्रमधकर्मणां कैङ्कर्यबुध्या भगवत्प्रीत्या फलसङ्गकर्तृत्वत्यागपूर्वकं कर्तव्यमिति विहितम्। गीतायाम्-

**यज्ञार्थात्कर्मणोऽन्यत्र(९.९),**

**यत्करोषि यदश्नासि यज्जुहोसि ददाति यत्।**

**यत्करिष्यति सर्वत्र तत्कुरुष्व मदर्पणम्।।(९.२७),**

**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं तत्।**

**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।।(१८.४६),**

**सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।(१८.५६),**

**मयि सर्वाणि कर्माणि सन्यस्याध्यात्मचेतसा।**

**निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः।।(३.३०)**

इत्यादिभिः श्लोकैः

भगवद्रामानुजाचार्याः वर्णाश्रमाचारपालनं केवलभगवत्कैङ्कर्य-बुध्या फलसङ्गकर्तृत्वत्यागपूर्वं निर्वहेदित्यूचुः।

**मोक्षसाधनम् - भक्तियोगः**

मुक्तिर्नाम महानन्दः। **दिदेविषति मानुषः स च तितर्विभूषयत्सौ शिशीर्विषति सर्वदा विविधयिष्यते तेन च मुमुक्तिषति तत्वगत्यवगते स्स निस्संशयः निविवित्विषति सर्वदा सचरिरंग भिक्षूषते** इत्यानन्दशब्दस्य पूर्वाचार्याणामाभाणकम्। अस्यायमर्थः। मनुष्यः देवत्वमिच्छेत्, देवः इन्द्रत्वमिच्छेत्, इन्द्रः रुद्रपदमिच्छेत्, रुद्रः चतुर्मुखपदमिच्छेत्, चतुर्मुखस्तु मुक्तिमिच्छेत्, मुक्तः नित्यमिच्छेत्, नित्यस्तु श्रीरङ्गे भिक्षूषते। तथैव आनन्दा-भिलाषायाः परमावधिः महान्दप्राप्तिरेव खलु। एवमेव- **स ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वावसन्तं प्रियाप्रिये न स्पृशत** इति श्रुत्युक्तिः। अर्थात् नरः यावद्भाविशरीरवान् भवेत्तावद्दुःखमिश्रिता-नन्दानुभवमाप्नोति। यद्यशरीरो भवेत्तर्हि निरतिशयानन्दानुभवः सिध्यत्ये। शरीरस्य निरन्वयविनाशः कथं घटत इति चेत्-

**भिद्यते ह्यदयग्रन्थिश्च छिद्यन्ते सर्वसंशयाः।**

**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।**[१०] इति

मुण्डकोपनिषण्मन्त्रानुसारं परमात्मसाक्षात्कारेण जीवस्य ग्रन्थिरूपः शरीरसम्बन्धः स्वयमेव छिद्यत इत्यर्थः। तर्हि परमात्मदर्शनं- **यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वामिति** समाधानम्। अत्र वरणं पमरात्मात्मकं वृणुत इत्यनेन प्रियतम एव हि वरणीयो भवति इति, सः प्रियतमः प्रीतिपूर्वमनुध्यानं भक्तिरित्य-भिधीयत इत्युक्त्या भक्तियुक्तस्य नरस्यैव सिध्यत इति, स एव मोक्षपथगामीति भगवद्रामानुजाचार्याणां सिद्धान्तस्य सारांशः। भाष्यस्यावतारिकायां गीतायां प्रतिपादितः मोक्षोपायः परमपुरुषार्थलक्षणमोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकर्मानुगृहीतं भक्तियोगमेवावतारयामास इति, सर्वेषु पुरुषार्थेषु मोक्षसाधनत्वेन वेदान्तेषूपदिष्टं ज्ञानकर्माङ्गभूतं भक्तियोगंभगवद्गीताशास्त्रेणलोके प्रवर्तयामास इत्यर्थः। कृत्स्नापि गीता भक्तियोगपरत्वेनैव भगवता प्रोक्तमिति, तत्र हेतुः स्वधर्मज्ञानवैराग्यसाध्यभक्त्यैकगोचरः नारायणपरंब्राह्म गीता-शास्त्रे समीरितिः (गीतार्थ - संग्रहः) इति परमाचार्याणां यामुनाचार्याणां सूक्तिरेवात्र प्रमाणभूतम्।

मुक्तेः प्रधानसाधनं भक्तिरेव। भक्तिर्नाम तैलधारावदिच्छिन्नेन परमपुरुषं नारायणं शास्त्रविहितनियमैः ध्यानमिति द्वादशाध्याये सर्वैः श्लोकैः विवृतम्। एतदर्थं परमात्मनः परोक्षज्ञानमावश्यकम्। परोक्षज्ञानमपि सप्तमनवमदशमाध्यायेषु विवृण्वन् एकादशे सुष्ठु न्यरूपि।दशमैकादशाध्याययोः भक्तिस्वरूपं निरूपितम्। भक्त्यधिकारी स्वात्मसाक्षात्कार-समर्थः निष्कामयोगी। आत्मसाक्षात्कारः आत्मध्यानेन घटते। तत्रापि पुनः आत्मपरोक्षज्ञानमावश्यकम्। सः निष्कामकर्मयोगी एवमात्मतत्त्वज्ञानपूर्वकात्मसाक्षात्कारेण भक्तियोगं लब्ध्वा सदाचार्योपदेशेन परमात्मानं नारायणमुपास्य तस्यानुग्रहेण प्राकृतिकशरीरसम्बन्धं परित्यज्या -र्चिरादिमार्गे परमपद -मेत्य परमपुरुषसायुज्यमाप्नोति। भक्तिविषये-

**यो मद्भक्तस्स मे प्रियः(१२-१४),**

**हर्षामर्षभयोद्वेगैर्मुक्तो यस्स च मे प्रियः(१२-१७),**

**भक्तिमान् मे प्रियो नरः (११-१९),**

**भक्तास्तेतीव मे प्रियः(११.२०),**

**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।** इति च भक्तियोगवैशिष्ट्यं निरूपयामास।

भक्तियोगः विद्यासु राजा इति परिगणितः। एवं गुह्यविषयेषु राजा इत्यपि च कीत्र्यते। एवं गुह्यविषयेषु राजा इव श्रेष्ठतमः।

पवित्रमिति भगवत्प्राप्तये आटङ्करूपानि पापानि नाशयति, प्रत्यक्षतया बोध्यत इति, धर्मपथबोधक इति, अत्यन्तं प्रियतमत्वेन परिगृहीतः, सकलफलप्रदश्चेत्यष्टविधविशेषणानि भगवता उपदिष्टं भक्तियोगस्य। भक्ति सिध्यर्थं परस्परसम्बन्धज्ञानमपेक्षितम्। सः सम्बन्धः जीवेश्वरयोः नवधा विराजते। तान् नवविधसम्बन्धान् नवमे राजविद्यारागुह्यनामकेऽध्याये त्रिषु श्लोकेषु भगवान् श्रीकृष्णः अद्भुतरूपेणोपदिदेश इति रामानुजाचार्याः भाष्ये एवं व्यवृण्वन्। यथा-

1. पित्रपुत्रसम्बन्धः------ पिताहमस्य जगतः (१७)
2. रक्ष्यरक्षकसम्बन्धः------ निवासश्शरमं सुह्रत्(१८)
3. शेषशेषिभावसम्बन्धः----- मात धाता पितामहः(१७)
4. भार्याभर्तृसम्बन्धः---- गतिर्भर्ता(१८)
5. स्वस्वामिसम्बन्धः---- प्रभुः साक्षी(१८)
6. आधारादेयसम्बन्धः-----निधानं बीजमव्ययम्(१८)
7. ज्ञातृज्ञेयसम्बन्धः---- वेद्यं पवित्रमोङ्कारः(१७)
8. शरीरशरीभावसम्बन्धः---- सदसच्चाहमर्जुन(१९)
9. भोक्तृभोग्यसम्बन्धः---- भोक्ता च प्रभुरेव च(२४) इति।।

एवमेव विश्वरूपसन्दर्शनाध्याये एकादशे-

**नाहं वेदैर्न तपसा न दानेन न चेज्यया।**
**शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा।।**
**भक्त्या त्वनन्यया शक्यः अहमेवं विधोऽर्जुव।**
**ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप।।(११.५३,५४)**

इति द्वयोः

श्लोकयोः भक्त्या एव भगवतः यथार्थस्वरूपं बोध्यत इति, भगवत्सायुज्यमेष्यत इतिघण्टापथेन व्याख्यताः श्रीभाष्यकाराः। भक्तिप्राप्त्यर्थं विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षाणि सप्तविधसाधनानि प्रधानानीत्युच्यन्ते। तत्र जातिदुष्टाश्रयदुष्टनिमित्तदुष्टवर्जितानां पदार्थानां स्वीकरणेन शरीरपोषणं विवेक इत्यर्थः। कामादिविषयेष्व-नभिष्वङ्गः विमोकः इत्युक्तः। ध्येयवस्तुं भगवन्तं मनसि निधायानवरतध्यानविशेषः अभ्यासः। देवपितृऋष्यादि - पञ्चयज्ञाद्यनुष्ठानं शक्तितः निर्वहणमेव क्रिया इत्युच्यते। सत्यार्जवदयादानाहिंसान्यवस्तुष्वनासक्तिः कल्याण-मित्युच्यते। देशकालवस्तुनो प्रातिकूल्येऽपि स्थैर्यभावना अनवसादः। देशकालवस्तुनोरानुकूल्येऽपि स्थैर्यभावना अनुद्धर्षः। इत्यभिधीयन्ते। एतादृशलङणविशिष्टः एव नरः भक्तः इत्यभिध्यत इति भगवद्रामानुजाचार्याणा-मभिमतम्।

इत्थं श्रीमद्भगवद्गीता वृहत्सिन्धुसदृशः रामानुजभाष्यविशेषः अल्पे काले अनल्पे -ष्वक्षरेषु अक्षरपरब्रह्मविद्या - मृतत्त्वामास्वाद्यामानाः तदितरमन्यस्विस्मृतं स्यादेव। नूनं **ब्रह्मवेद ब्रह्मैव भवति (छा.उ)** इत्युपनिषद्वाक्यस्य प्रत्यक्षनिदर्शनं भगवद्रमानुजदर्शनमेवेत्यत्र नास्ति संशयलेशोऽरि। इति शम्।।,

## Bibleography :


1. Bhagavadramanujagranthamala –Telugu Version-1978
2. Geethabhashya (II.Vol.)–Telugu Version-1990
3. Mundakopanishad –Telugu vession-1975 Sri RamanujaKeerthikoumudi (IXVol.)Telugu version
4. Geethabhashyam- Tatparya Deepika commentary of SrimadVedantaDesika -1981– Sanskrit version
5. Srimadbhagavadgeetha -Telugucommentary-1985 by U.V. PTGVLarasimhacharya
7. Dasopanishadbhashyardthadeepika-(1995)Sanskrit Version


**संदर्भ ग्रन्थ : -**


१.छा.उ. 8.3.4.5)
२.भ.गी.9.10
३.भ.गी. 9.10
४.गी.सं.
५.7.7
६.गी.भा. 11.43
७.तै.उ.भ्रु
८.छा.उ.
९.9.26
१०.मुण्डकोपनिषत्